Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# आधुनिकी भारतीया नारी



मण्टु कुमार जाना
अनुसन्धाता,
श्री लालवहादुरशास्त्री राष्ट्रीयसंस्कृत विश्वविद्यालयः।

**Article Info**
Volume 4, Issue 1
Page Number : 37-45
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 05 Jan 2021
Published : 20 Jan 2021

**प्रस्तावना-** भारतीयसमाजे नारीणामादरणीयं विशिष्टं तथा गौरवमयं स्थानं वर्तते। सा देशस्य पवित्रपरम्परया प्रतिबद्धा , महता संस्कारेण परिष्कृता शुद्धा तथा च स्वकीयकर्तव्यं प्रति सततं संवेदनशीला, जाग्रता, समर्पिता च भवति। अतोहि तया भारतीयस्त्री, गृहस्वामिनी , गृहलक्ष्मी च गौरवमयी पदवी प्राप्यते।

परन्तु दुःखस्य कारणं वर्तते यत् सम्प्रत्यस्माकं देशस्य नारीभिः पाश्चात्यसंस्कृतेन प्रदूषितवातावरणमत्याधुनिकनिवासस्थानं, भङ्गिमा, शैली च, मूधा मोहाकर्षणमधिकृत्य दिग्भ्रमिता वृत्यन्ते। ताऽज्ञातवशेन अभारतीयसंस्कारमूरीकृत्य अधःपतनं प्रति सततमग्रे सरन्ति । या दुर्भाग्यपूर्णा स्थितिः केवलं नारीणां कृते नास्त्यपितु सम्पूर्णभारतीयसमाजस्य गौरवमयीसंस्कृतेः कृतेऽपि घातका अमङ्गलकारिणी संकेता च विद्यते। स्त्रीपुरुषौ उभौ परिवारस्य प्रधानौ अङ्गौ स्तः। यथा स्त्रीं विना पुरुषोऽपूर्णः तथैव स्त्र्यपि अपूर्णाऽस्ति। नदी सततं रोधासा संयुक्ता तथा उभयोर्मध्ये जीवनाधारा प्रवहमाना विद्येते। यथा शुक्तिमन्त मुक्तायाः स्थितिर्वर्तते तथैव स्त्रीपुरुषयोर्मध्ये सन्ततिर्भवति । अर्थाद् ब्रह्मणा निर्मितेतादृशीं विश्वसृष्टिप्रक्रियां परिचालयितुमुभौ समानरुपेण अंशीदारोऽस्तः । अनन्तरं ताभ्यां वैवाहिकबन्धने आबद्धं भूत्वा गृहस्थाश्रमं प्रविश्येते। अथ गृहस्थाश्रमे आगत्य नारी कन्यातो वध्वोः स्थानं गृह्णाति। आचार्येण मनुना विषयेऽस्मिन् तस्य प्रतिपादितः सिद्धान्तो मनुस्मृतिग्रन्थे समर्थ्यते

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

यत् – " **यो भर्त्ता स्मृतांगना** " अर्थाद् यः पुरुषः सा स्त्री , अस्य मतस्य उद्देश्योऽस्ति यद् गृहस्थजीवने यत्येव पत्युर्भूमिका तत्येव भार्याया अस्ति। प्राचीनसंस्कृतवाङ्मये पत्नीरुपेण स्त्रीमहिमाया यशः पाठको रोमाञ्चितं क्रियते यतोहि –

**यस्यां भूतं समभवत् यस्यां विश्वमिदं जगत् ।**
**तमद्य गाथां गास्यामि स्त्रीणां यदुत्तमं यथः ॥** ( पारस्करगृह्यसूत्रम् )

परन्तु सृष्टिप्रारम्भिककालात् नारीभिः समाजे उच्चस्थानं प्राप्तमासीत् । वास्तविकताऽस्ति यत् समयपरिस्थितिपरिवर्तनेन साकं सामाजिकमूल्ये पृथकत्वमायाति अर्थात् स्त्रीभिर्निम्नस्थानमपि प्राप्यते ।

## स्त्रीम्प्रति सामान्याऽवधारणा

पारिवारिकसामजिकजीवने स्त्रीणां पुरुषेण साकं विविधः सम्बन्धो दृश्यते । येनाधारेण नारीणां भिन्नम्भिन्नं रुपं नाम च सामाजिकस्तरे आयाति , यथा माता, भगिनी , कन्या , पत्नी प्रभृतिरुपेण । मातृस्वरुपा स्त्री पुरुषेण निरन्तरं सम्मानिता पूजिता च प्रभवति । भगिनी, तनया च रुपेण सा प्रेमास्पदस्याधिकारिणी , भार्यारुपेण पुरुषस्य स्वामिनीति द्योतते ।[i] अर्थात् स्त्रीभिः सर्वदा भर्त्रा संरक्षिता सहानुभूतिः सम्मानश्च प्राप्यते । स्वकीयभर्तृप्रियकार्यतत्परताऽनुसृतानारीणामेतादृशङ्कर्तव्यमस्ति । प्रसङ्गेऽस्मिन् रामायणे निगद्यते यथा –

**भर्ता हि खलु नारीणां गुणवान्निर्गुणोऽपि वा ।**
**धर्म विमृशमानानां प्रत्यक्षं देवि दैवतम् ॥ (राः माः २/६२.८ )**

शतपुत्राणाञ्जननी भूतेऽपि पतिविरहिता स्त्री दुःखम्प्राप्नोति । पितामाताभ्राता चादौ स्थितेऽपि सा सततं भर्तुसहयोगमपेक्षते , यतः पाणिगृहीतस्त्रीणां कृते तासाम्भर्ता पूजयेत् । अतोहि—

**नापतिः सुखमेघेतं या स्यादपि शतात्मजा ।**
**मितन्ददाति हि पिता मितं माता मितं सुतः ।**
**अमितस्य हि दातारं भर्तारं का न पूजयेत् । ( राः माः २.९३.३० )**

स्त्रीभिर्वधुरुपेण वयश्रेष्ठानां सेवा शुश्रूषा , भार्यारुपेण भर्तुरिच्छानुरुपं कार्यं तथा मातारुपेण सन्तानसन्तोतिपालनपोषणं विधीयते । याऽवधारणा केवलमद्यतने युगे नास्त्यपितु सहस्रवर्षपूर्वेभ्यो वैदिकयुगेऽप्यासीत् । तदानीन्तनसमये स्त्री गृहात् कदापि न वर्हिगता परन्तु वर्तमाने काले स्त्री पुरुषेण समं वर्हिगत्वा प्रत्येकं क्षेत्रे कार्येरताऽस्ति । एतदतिरिक्तं पतिव्रतास्त्रीतः सदा अपेक्षते पत्नीरुपेण तस्याः धर्मपालनम् , यतोहि समाजे स्त्रियः पतिव्रतपालनं वैवाहिकजीवनस्यावश्यकमङ्गं वर्तते । यस्य पालनं प्रत्येकं युगे स्त्रीभिरेवमेव स्वीक्रियते । पतिकर्तव्यपालनरता-श्रेष्ठगृहिणीनां गुणस्य परिगण्यते नाट्यकारेण विशाखदत्तेन—

**गुणपत्युपायनिलय स्थितिहेतोः साधिके त्रिवर्गस्य ।**
**मदभवन नीतिविद्ये कार्य्यादार्य्ये द्रुतमुपैहि ॥ ( मुद्राराक्षसम् )**

अर्थाद् गृहिणी गुणवती, सर्वेषामुपायानां कारणस्वरुपा , स्वर्गस्थितेः कारणभूतधर्मार्थकामस्य साधिका , गृहस्थनीतिविद्यायां पारदर्शिता तथा सर्वकार्ये शिक्षादात्रीरूपेण विभाव्यते ।

**किमिति समाजे नारीभिः प्राप्ता स्वतन्त्रता**

प्रकृति-पुरुषस्य मध्ये यथैव शारीरिकसंरचनाशक्तेरन्तरमस्ति तथैव स्त्रियाम् जीवनपद्धतौ अन्तरमस्ति , परन्तु तस्य प्रभावः पारिवरिकसामाजिकस्थित्योपरि स्वाभाविकं वर्तते । प्राप्तसाक्ष्याधारोपरि नारीस्वातन्त्रदृष्टितः ऋग्वैदिकसमाजेन पर्याप्तोदाहरणं दीयते । परन्तु उत्तरवैदिकसमाजे शनैः शनैः स्त्रियः स्थितिरपकर्षति । अवान्तरकाले स्त्रीस्थितेः पतनं भवति यत् महाकाव्यकालं पर्यन्तमागते तस्याधिकारं पूर्ववर्तीयुगस्यापेक्षा नूनतरं भवति । यतो रामायणे महाभारते च कुत्रापि तु स्त्रीनिन्दा परिलक्ष्यते । अन्यत्र स्त्रीरहितो गृहं वनसदृशरुच्यते । [ii] मातृस्वरुपा स्त्री श्रेष्ठा मार्गदर्शिका उद्यते । [iii] तनयाकृते महाभारते सुवचनं कथ्यते--- **" नित्यं निवसते लक्ष्मीः कन्यकासु प्रतिष्ठिता " ।**

प्राचीनभारतीयसमाजे तथा वैदिकसमाजेऽपि पर्दाप्रथाया अस्तित्वं कुत्रापि नासीत् , अस्य प्रमाणं ऋग्वेदस्य दशममण्डले प्राप्यते । [iv] परवर्तीसाहित्ये कुत्राप्यस्याः प्रथाया उल्लिख्यते , कुत्रापि नास्ति । यथा रघुवंश-

नैषधचरितादि- महाकाव्ये स्वयम्बरप्रथा प्रमाणीक्रियते यत् तस्मिनसमये स्त्रिः सुसज्जितसभायां स्वकीयमनोवचो वक्तुमधिकारिण्यासीत् , परन्तु भारते इस्लामशासकानामागमने प्रदाप्रथाया आविर्भावः परिलक्ष्यते। एवं शनैः शनैः भारतीयसंस्कृते परपुरुषस्य समक्षे विवाहितानारीणामवगुण्ठनमवश्यमेव करणीयमिति प्रचल्यते।

**नारीणां चलनं कथं भवितव्यम् --**

अस्मिनविषये पूर्वे वेदे उद्धरणं सम्प्राप्यते—

**अधः पश्यस्व मोपरि सन्तरां पादकौ हरः।**
**मा ते कशप्लेकौ दृशन् स्त्री हि व्रह्मा वभुविथ॥**

मन्त्रेऽस्मिन् नारीणां शीलं सम्यक्तया विभाव्यते। अर्थात्

१. स्त्रियः सततं स्वकीया दृष्टिरधः स्थापयेद् , उपरि नास्ति नीचैः दृष्टि स्थापना लज्जाशालीनतायाश्च चिह्नं भवति। उपरि दर्शनं निर्लज्जताशालीनतायाश्च द्योतको वर्तते।

२. स्त्रीणां चलनकाले द्वौ पादौ मिलित्वा वहुसावधानतया चलेयुः , चञ्चलताभावं मा प्रदर्शेयुः।

३. स्त्रियामनेन प्रकारेण वस्त्राणि परिधातव्यानि, यथा- तासां गुप्ताङ्गाः स्तनोदरपृष्टदेशोर्वादि न दर्शयनं करणीयमस्ति। स्वकीयाङ्गस्य प्रदर्शनं विलासितालम्पटतायाश्च परिचयोऽस्ति।

५. नारीणां कृतेऽधिकं प्रतिवन्धनं किमर्थम् ? एतादृशी कठोरसाधना कथम् ? अस्याः जिज्ञासायाः समाधाने वक्तुम शक्यते यत् नारी व्रह्माऽस्ति , सा जीवननिर्मात्री सृष्टिकत्री च, यदि नारी इतस्ततो भवति तर्हि सृष्टेः विनाशमवश्यमेव भविष्यति।

**अद्यतनं नारीणां वस्त्रपरिधानविषये काचित् स्थिति:--**

आधुनिकसामाजिकजीवने नारीणां वस्त्रपरिधानविषये प्रतिगृहे वहुसमस्याऽऽगता। ताभिरनिशं " अशैलीभङ्गिमामधिकृत्य वस्त्राणि परिधीयन्ते। ग्रामे अल्पवयसियुवतीनां मध्ये अशैलीभङ्गिमा किञ्चिदल्पं , परन्तु नगरेऽधिकतमं दरिदृश्यते। सामन्यतमो ग्राम्यनारीभि र्लज्जाशीला भूयते, अतः ताभिः वस्त्रपरिधानविषये परिवारस्य सम्मानसंस्कारश्च विचिन्त्य ऊरीक्रियेते। सम्प्रति ग्रामीयनारीणां किञ्चित् परिवर्तनं संलक्ष्यते। नगरीयविवाहितानारीभिरर्धवस्त्राणि सततं परिधत्तानि। ताभिः कदापि स्वकीयपरिवारस्य विषये न मन्यते। विभिन्नेष्वत्सवेषु स्त्रिभिः मदिरापानमपि कृतमासीत् , एतादृशी परम्परा प्राचीनकालादेव वर्तते , किन्तु प्राचीनकालीयनारीभिराधुनिकीनारीसदृशो नासीदपितु ताः सततं कुलमर्यादासम्पन्नभूता आसन्। अस्मिन् विषये रघुवंशमहाकाव्याद् उद्धरणं प्रदीयते---

**सुवदनावदनासवसम्भृतस्तदनुवादिगुणः कुसुमोदगमः।**
**मधुकरैकरोन्मघु लोलुपैर्पकुलमाकुलमायपंक्तिभिः॥**

साम्प्रतिकसमये विलासभोगिस्त्रियो रात्रौ क्लावं गच्छन्ति । समयातिवाहनस्य कृते महत्वपूर्णमेकं स्थानं नाइट्क्लावो वर्तते। तत्र प्रगम्य मद्यपाने, नृत्येऽन्यकुकर्मणि चानिशं लिप्ताः सन्ति। ताभिः मद्यपानं विना किमपि कर्तुं न शक्यन्ते। एतादृशोऽनाचारः तासां न शोभनीयकरणीयश्च। साम्प्रतिकीस्त्रियः सामान्यप्रमण्डलजातद्रव्यानि व्यवहर्तुं न काङ्क्ष्यन्ते , ताभिः वैदेशीयजातवहुमूल्यद्रव्यानि व्यवह्रियन्ते। तस्मात् कारणाद् अधिकापव्ययार्थं मिथः प्रायशः कलहो भवति। एषो भारतीयनारीणांकृते कलङ्को वर्तते। शृङ्गाराभूषणमत्यावश्यकं नारीणां परन्तु तासां भर्तुरर्थोनैतिकावस्थां दृष्ट्वा व्ययः करणीयः। अद्यतनं दृश्यते यद् अधिकतया स्त्रीः अपरस्त्रियोऽलंकारादि संदृश्य स्वकीयार्थं वाञ्छति। अस्यामेषो महान् दोषः। यस्मात् सपरिवारे मनमालिन्यं प्रचलति। सैव सुगृहिणी वुद्धिमती च नारी भवति या अनावश्यकद्रव्यानि न क्रीणाति। ताः सर्वदा सुखिनो भवन्ति।

प्राचीनमहाकाव्ये वर्णितं परिवारस्य स्वरुपं पितृमूलकमासीत्। यत्र पितैव गृहस्थस्वामी तथा पुरुषप्रधानसमाजासीत्। तस्मिन् समये भर्तुः प्रियकार्यं स्वकीयपत्नी कृता, श्वशुरशुश्रूषा सन्ततिपोषणादि कार्यं कृत्वा स्वयमेवाधिकारिण्यभवत्। अतः पत्नी गृहृण्यत्युच्यते – **"पूजनीया महाभागाः पुण्याश्च गृहदीस्यः" ( महाभारत ५.३८) महाभारते उच्यते – " गृहे सर्वे तिष्ठन्तोऽपि पत्नीं विना गृहं रसहीनं तथा मरुस्थलसदृशो दृश्यते "।** अतो वक्तुं शक्यते प्राचीनसमये यतोहि पुरुषप्रधानसमाजासीत् किन्तु परिवारे नारीणां स्थिति कदापि निकृष्टा नासीत्। यतो मनुना कथ्यते – **" यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता "।** परन्तु अर्वाचीनसमये सपरिवारे तासां स्थिति सततं निकृष्टा वर्तते। ताभिः कदापि गुरुश्रेष्ठानां प्रति न सत्क्रियते। साम्प्रतिकसमये काषांचन्-भारतीयनारीणां जीवने शनैः शनैः वहूनि परिवर्तनान्यागतानि सन्ति। भारतीयनारीभिः स्वकीयाधिकारार्थं प्रयतनं कर्तुं शक्यते। ताभिः स्वकीयजीवनमग्रसरायोत्तममार्गे प्रव्रज्यते। अग्रे साफ्यलताऽपि सम्प्राप्यन्ते। अद्यतने समये पूर्णरुपेण ताः स्वतन्त्रता वर्तते, तथा प्रत्येकं कार्ये वहुकुशलिन्यापि सन्ति। तासामधिकशिक्षाग्रहणार्थं सर्वकारेणानेका योजना आनीयते। अतोऽधिकतया महिला सुशिक्षिता जाता। ताः कस्मिन्नपि कार्ये पश्चात् नाग्रसरति। एवमेव नारी सम्प्रत्यागामिनीकालेऽपि सततं शक्तिरुपेण प्रतिभास्यते।

## समाजे नारीणां महत्वमाचारव्यवहारश्च।

यथा झांसी लक्ष्मीवाई इतिहासे चिराय तस्याः नारीशक्तिः त्यागश्च सिद्धिक्रियते स्म। वास्तवसमाजे दमनविरोधो वा प्रगतिशीलनवीनविचारधारा-स्वीकरणमाधुनिकता वर्तते। यदि महिलया किञ्चिदुच्यते क्रियते च तर्हि कथञ्चित् केनोऽपि अङ्गुलिः प्रदर्श्यते। यतोहि रामायणे श्रीरामेणपि जनकतनयासीताया अग्निपरीक्षाकृत्य प्रमाणीक्रियते यत् नारीणां महत्वं केवलं पुरुषेणनिर्मितपरम्परायां आवद्धिभूतनिवसनं तासां कर्तव्यं विद्यते। परन्तु समय इदानीं परिवर्तते, अतः ताभिः सर्वमिदमुपेक्ष्य गृहतः वर्हि निर्गम्याधुनिकतायाः परिचयोपस्थाप्यते।
फलतोऽद्यतनीयनारीभिः पुरुषेण समं प्रत्येकं कार्ये अन्योन्यं मिलित्वा क्रियते तथा विज्ञानप्रयुक्तिविद्यया सह प्रायशः सर्वत्र स्वकीयोपयोगिता विधीयते। सा

समाजं राष्ट्रं वा यत् सिद्धं कृत्वा दर्शयति , शक्तितरुत क्षमतादृष्टितः पुरुषादपि किञ्चिदल्पं नास्ति । अस्माभिः सर्वैः ज्ञायते यत् सम्प्रति सदगुणसम्पन्ना-सुविचारसम्पन्ना-सुशीला –सच्चरित्रयुक्ता-लज्जाशीला-विनम्रसम्पन्नानारी वहु अल्पं मिलति । ग्रामे तथा नगरेऽपि दृश्यते अद्यतनीयनारीभिः स्वपितुरिच्छानुसारेण पाणिग्रहणं कर्तुं नेष्यते , ताभिः स्वकीयरिच्छानुसारेणोपयम्यते । अथवा नारीपुरुषौ उभयोः स्वेच्छाकृतो गृहाद् वर्हि पलायेते, परन्तु प्राचीनकाले एषा परम्परा नासीत् । वर्तमाना- भारतीयनारीं मध्ययुगीयनारीव पर्दायां सामाजिकबन्धने शिक्षाया च प्रतारितं न शक्यते । एवं तस्याः चित्रपतङ्गसदृशरुड्डयनं न शोभते । शीललज्जे नारीणां आभूषणे स्तः । परिवारगठनपोषणञ्च तस्याः सहजदायित्वं वर्तते । व्यवहारकुशलता तस्याः पत्युः पूरकोऽस्ति । सा गृहलक्ष्मी निर्मित्य स्वकीयपरिवारस्य देशस्य चाधिकं कल्याणं कर्तुं शक्यते , न तु मेमसाहवतुल्य । एषो भारतीयनारीणामुत्तमादर्शो भवितुं शक्नोति । गृहस्थाश्रमधर्मे केवलं न अपितु वानप्रस्थधर्मपालनेऽपि भारतीयनारीभिः पूर्णसहयोगं कृत्वा परिवारेषु आनन्दसुखशान्तिश्च प्रदीयन्ते । सा नारी यदि कुलटा, व्यभिचारिणी, भवति तर्हि पुरुषस्यजीवनं नारकीयः प्रभवति । एता दुर्गुणाः सम्प्रत्याधुनिकभारतीयनारीणां मध्ये संदृश्यन्ते । यतोहि संलक्ष्यते

**लज्जा वासो भूषणं शुद्धशीलं पादक्षेपो धर्ममार्गे च यस्याः ।**
**नित्यं पत्युः सेवनं मिष्टवाणी धन्या सा स्त्री पूतयत्येव पृथ्वीम् ॥**

महर्षिगर्गं प्रति भगवता श्रीशङ्करेणोद्यते

**यदगृहे रमते नारी लक्ष्मीस्तद्गृहवासिनी ।**
**देवताः कोटिशो वत्स न त्यजन्ति गृहं हि तत् ॥**

व्यभिचारीणां स्त्रीणां कृते महान् दोषः तथा सतीत्वस्य नाशको वर्तते । वर्तमाने समाजे तामन्तरा परपुरुषसेवनमधिकतया दरीदृश्यते , यद् आचरणं लोकनिन्दायाः तथा विनाशस्य

प्रधानं कारणमस्ति । अपि तु कुसङ्गता अर्थात् परनिन्दाकारिणी, परपुरुषाणां प्रशंसाकारिणी, इतस्ततः मुधा परिभ्रमनकारिणी, अतिकलहकारिणी, नारी सर्वतो ध्वंसते।

**उपसंहृतिः** – स्वतन्त्रतानन्तरं भारतीयमहिलया स्वकीयमहिमा सम्प्राप्ताऽस्ति । भारतीयसंविधानेन सा समानाधिकारो दीयते । तस्याः हीनतायाः स्थितिरिदानीमानन्देन समाप्ता जाता। भारतस्य विभिन्नेषु स्थानेषु अस्याः समानतायाः फलं परिलक्ष्यते । ताभिः सम्प्रत्यधिकतया विभिन्नकार्यस्थले सुधिकारिण्याः कृते योग्यसम्मानोऽधिगम्यते। महिलाभिः स्वकीयां चिकित्सिका , न्यायाधीशा , आईए.एस अधिकारिणी, प्राचार्या इत्यादिनी रुपेण समाजे विभिन्नस्थाने स्थापनं क्रियते। सर्वकारेण ताः वहुसुविधा अवसरोऽपि प्रयच्छ्यते। महिलाः वित्तीयदेयता इदानीं न मन्यन्ते। पुरुषेण कार्यालये तथा विभिन्नव्यवसायिकस्थलेऽपि महिलानां कृते प्रतीक्ष्यते। अस्माकं समाजे जीवने च महिला जन्मनः मृत्युपर्यन्तं महती भूमिका निर्वापयति। स्वकीयतायाः सर्वासां भूमिकायां निपुणता दर्शयत्यपि अद्यतनीयाधुनिकयुगे महिला पुरुषस्य पृष्ठतो दृश्यते। पुरुषप्रधानसमाजे महिलायाः योग्यता पुरुषात् न्यूनं विद्यते। यद्यस्माभिः अद्यत्वावस्था पौराणिकसमाजस्य स्थित्या सह उपमीयते तर्हि सम्प्रति स्पष्टरुपेणावश्यमेव किञ्चित् परिवर्तनं परिलक्ष्यते।

सन्दर्भः

---

i . नापति सुखमेघेतं या स्यादपि शतात्मजा।
मितं ददाति हि पिता मितं माता मितं सुतः।
अमितस्य हि दातारं भर्तारं का न पूजयेत् ॥ रामा० २.३९.३०-३१

ii . पुत्रपौत्रवधूभृत्यैराकीर्णमपि सर्वतः।
भार्याहीनगृहस्थस्य शून्यमेव गृहं भजेत्। महाभारत् १२.४.४

iii . नास्ति मातृसम गुरुः। माता गरीयसी यच्च तेनैतां मन्यते जनः। महाभारत १३.११.१४

iv . सुमङ्गलीरियं वधुरिया समेत पश्यत।
सौभाग्यमस्यै दत्वायाऽथास्तं विपरेत न ॥ ऋक्० १०.८५.३३

# सन्दर्भग्रन्थसूची


१. ऋग्वेदः- डा. गङ्गा सहाय शर्मा , संस्कृत साहित्यप्रकाशनम् , नव दिल्ली ११०००२. २०१६.

२. नैषधचरितम्- डा. समीरकुमारो दत्तः , संस्कृत वुकडिपो, कलकाता-७०००० ६ , २००२.

३. मनुस्मृतिः - डा. अन्नदाशंकरः पाहाडी , संस्कृत वुकडिपो, कलकाता-७००००६. २०००५.

४. महाभारतम् - डा. सत्येन्द्रनाथः सेनः , साक्षरता प्रकाशनम्, ६०, पटुयाटोला लेन् , कलकाता७००००९, १९८२.

५. मुद्राराक्षसम् - डा. उदयचन्द्रो वन्द्योपाध्यायः, अनीता वन्द्योपाध्यायः, संस्कृत वुकडिपो, कलकाता-७००००६, २००८.

६. रघुवंशम् - आचार्यो धारादत्तो मिश्रः , श्री जनार्दन पाण्डेय, मोतिलालो वनारसी दासः , दिल्ली,२००२.

७. श्रीमद्वाल्मीकिरामायणम् – चतुर्वेदी द्वारकाप्रसादः शर्मा , रामनारायण लालः प्रकाशनम् , इलाहावादः १९२७, २०००.

८. श्रीमद्भगवद्गीता- स्वामी श्री अडगडा नन्दः , महिन्द्रा इंटरप्रकाशनम् , लालवागः मुम्बई-४०००२२, २००४.

९. सिद्धान्तकौमुदी – डा. सत्यरञ्जनो वन्द्योपाध्यायः , संस्कृत -पुस्तक –भाण्डारम् , कलकाता-७०००६ , २०११.